त्वमङ्गाङ्ग त्वन्त्वमङ्ग प्प्र प्प्राङ्ग त्वन्त्वमङ्ग प्प्र। अङ्ग प्प्र प्प्राङ्गाङ्ग प्प्र शंसिषः शंसिषः प्प्राङ्गाङ्ग प्प्र शंसिषः। प्र शंसिषः शंसिषः प्प्र प्प्र शंसिषो देवो देवः शंसिषः प्प्र प्प्र शंसिषो देवः। शंसिषो देवो देवः शंसिषः शंसिषो देवः शविष्ठ शविष्ठ देवः शंसिषः शंसिषो देवः शविष्ठ। देवः शविष्ठ शविष्ठ देवो देवः शविष्ठ मर्त्त्यम्मर्त्त्यं शविष्ठ देवो देवः शविष्ठ मर्त्त्यम्। शविष्ठ मर्त्त्यम्मर्त्त्यं शविष्ठ शविष्ठ मर्त्त्यम्। मर्त्त्यमिति मर्त्त्यम्॥ न

---

1. प्राक् अपाक् तथा अपाक् उदक् यहाँ स्पर्शोऽपञ्चमः स्वरघौ तृतीयम्(वा.प्रा.४.१२०) इस सूत्र से ककार गकार होता है।

2. आविर्निरिड इडाया वसतिर्वरिवः (वा. प्रा. ३.२३) इस सूत्र के अनुसार यहाँ निः का विसर्जनीय पकार हो जाता है।

त्वत्त्वन्न न त्वदुन्न्योऽन्न्यस्त्वन्न न त्वदुन्न्यः। त्वदुन्न्योऽन्न्यस्त्वत्त्वदुन्न्यो मंघवन्नमघ-वन्नुन्न्यस्त्वत्त्वदुन्न्यो मंघवन्। अुन्न्यो मंघवन्नमघवन्नुन्न्योऽन्न्यो मंघवन्नस्त्यस्ति मघवन्नुन्न्योऽन्न्यो मंघवन्नस्ति। मुघुवुन्नुस्त्युस्ति मुघुवुन्नुमुघुवुन्नुस्ति मुर्ङ्डिता मंर्ङ्डितास्तिं मघवन्नमघवन्नस्ति मर्ङ्डिता। मुघुवुन्निति मघ वन्। अुस्ति मुर्ङ्डिता मंर्ङ्डितास्त्यंस्ति मर्ङ्डितेन्द्रेन्द्रं मर्ङ्डितास्त्यंस्ति मर्ङ्डितेन्द्रं। मुर्ङ्डितेन्द्रेन्द्रं मर्ङ्डिता मंर्ङ्डितेन्द्र ब्रवींमि ब्रवीमीन्द्रं मर्ङ्डिता मंर्ङ्डितेन्द्र ब्रवींमि। इन्द्र ब्रवींमि ब्रवीमीन्द्रेन्द्र ब्रवींमि ते ते ब्रवीमीन्द्रेन्द्र ब्रवींमि ते। ब्रवींमि ते ते ब्रवींमि ब्रवींमि ते ब्रचो ब्रचंस्ते ब्रवींमि ब्रवींमि ते ब्रचंः। ते ब्रचो ब्रचंस्ते ते ब्रचंः। ब्रचऽ इति वचंः[1] ॥३५॥

॥इति माध्यन्दिनीयघनपाठे षष्ठोध्यायः॥

[1]. अवसाने च (वा. प्रा. ४.१९६) अवसान (विराम) में स्थित पद का स्थितोपस्थित पाठ किया जाता है।

॥सप्तमोध्यायः॥

हरिः॑ॐ॥ व्वाचस्प्पत॑ये पत॑ये व्वाचो व्वाचस्प्पत॑ये पवस्व पवस्व पत॑ये व्वाचो व्वाचस्प्पत॑ये पवस्व[1]। पत॑ये पवस्व पवस्व पत॑ये पत॑ये पवस्व व्वृष्ण्णो व्वृष्ण्णं॑ः पवस्व पत॑ये पत॑ये पवस्व व्वृष्ण्णं॑ः। पवस्व व्वृष्ण्णो व्वृष्ण्णं॑ः पवस्व पवस्व व्वृष्ण्णोऽ अꣳशुब्भ्यामꣳशुब्भ्याँव्वृष्ण्णं॑ः पवस्व पवस्व व्वृष्ण्णोऽ अꣳशुब्भ्याम्। व्वृष्ण्णोऽ अꣳशुब्भ्यामꣳशुब्भ्याँव्वृष्ण्णो व्वृष्ण्णोऽ अꣳशुब्भ्याङ्ग-भ॑स्त्तिपूतो गभ॑स्त्तिपूतोꣳशुब्भ्याँव्वृष्ण्णो व्वृष्ण्णोऽ अꣳशुब्भ्याङ्गभ॑स्त्तिपूतः। अꣳशुब्भ्याङ्गभ॑स्त्तिपूतो गभ॑स्त्तिपूतोꣳशुब्भ्यामꣳशुब्भ्याङ्गभ॑स्त्तिपूतः। अꣳशु-ब्भ्यामित्यꣳशु भ्याम्। गभ॑स्त्तिपूतऽ इति गभ॑स्त्ति पूतः॥ देवो देवेब्भ्यो॑ देवेब्भ्यो॑ देवो देवो देवेब्भ्य॑ः पवस्व पवस्व देवेब्भ्यो॑ देवो देवो देवेब्भ्य॑ः पवस्व। देवेब्भ्य॑ः पवस्व पवस्व देवेब्भ्यो॑ देवेब्भ्य॑ः पवस्व य्येषाँꣳय्येषा॑म्पवस्व देवेब्भ्यो॑ देवेब्भ्य॑ः पवस्व य्येषा॑म्। पवस्व य्येषाँꣳय्येषा॑म्पवस्व पवस्व य्येषा॑म्भागो भागो य्येषा॑म्पवस्व पवस्व य्येषा॑म्भागः। य्येषा॑म्भागो भागो य्येषाँꣳय्येषा॑म्भागोस्यसिं भागो य्येषाँꣳय्येषा॑म्भागोसिं[2]। भागोस्यसिं भागो भागोसिं। असीत्त्यसिं॥१॥

मधु॑मतीर्न्नो नो मधु॑मतीर्म्मधु॑मतीर्न्नऽ इषऽ इषो॑ नो मधु॑मतीर्म्मधु॑मतीर्न्नऽ इषं॑ः। मधु॑मतीरिति मधु॑ मतीः। नऽ इषऽ इषो॑ नो नऽ इषं॑स्कृधि कृधीषो॑ नो नऽ इषं॑स्कृधि। इषं॑स्कृधि कृधीषऽ इषं॑स्कृधि य्यद्यत्कृधीषऽ इषं॑स्कृधि य्यत्। कृधि य्यद्यत्कृ॑धि कृधि य्यत्ते॑ ते य्यत्कृ॑धि कृधि य्यत्ते॑। य्यत्ते॑ ते य्यद्यत्ते॑ सोम सोम ते य्यद्यत्ते॑ सोम। ते सोम सोम ते ते सोमादा॑ब्भ्यमदा॑ब्भ्यꣳ सोम ते ते सोमादा॑ब्भ्यम्। सोमादा॑ब्भ्यमदा॑ब्भ्यꣳ सोम सोमादा॑ब्भ्यन्नाम नामादा॑ब्भ्यꣳ सोम सोमादा॑-

---

[1]. पत्यौ तालव्यस्वरोदये(वा.प्रा.३.३५) तथा पदे च(वा.प्रा.३.३६) के अनुसार वाचः पतये यहाँ विसर्जनीय सकार होता है।

[2]. वा.प्रा.२.४०. के अनुसार यहाँ मधुमतीः पद बाद में होने से असि पद आद्युदात्त है।

ब्भ्यु॒न्नाम॑। अदा॑ब्भ्यु॒न्नाम॒ नामादा॑ब्भ्यु॒मदा॑ब्भ्यु॒न्नाम॒ जागृ॑वि॒ जागृ॑वि॒ नामादा॑-ब्भ्यु॒मदा॑ब्भ्यु॒न्नाम॒ जागृ॑वि। नाम॒ जागृ॑वि॒ जागृ॑वि॒ नाम॒ नाम॒ जागृ॑वि॒ तस्म्मै॒ तस्म्मै॒ जागृ॑वि॒ नाम॒ नाम॒ जागृ॑वि॒ तस्म्मै॑। जागृ॑वि॒ तस्म्मै॒ तस्म्मै॒ जागृ॑वि॒ जागृ॑वि॒ तस्म्मै॑ ते ते॒ तस्म्मै॒ जागृ॑वि॒ जागृ॑वि॒ तस्म्मै॑ ते। तस्म्मै॑ ते ते॒ तस्म्मै॒ तस्म्मै॑ ते सोम सोम ते॒ तस्म्मै॒ तस्म्मै॑ ते सोम। ते॒ सो॒म॒ सो॒म॒ ते॒ ते॒ सो॒म॒ सोमा॑य॒ सोमा॑य सोम ते ते सोम॒ सोमा॑य। सो॒म॒ सोमा॑य॒ सोमा॑य सोम सोम॒ सोमा॑य॒ स्वाहा॒ स्वाहा॒ सोमा॑य सोम सोम॒ सोमा॑य॒ स्वाहा॑। सोमा॑य॒ स्वाहा॒ स्वाहा॒ सोमा॑य॒ सोमा॑य॒ स्वाहा॒ स्वाङ्क्कृ॑त॒ꣳ स्वाङ्क्कृ॑त॒ꣳ स्वाहा॒ सोमा॑य॒ सोमा॑य॒ स्वाहा॒ स्वाङ्क्कृ॑तꣳ। स्वाहा॒ स्वाङ्क्कृ॑त॒ꣳ स्वाङ्क्कृ॑त॒ꣳ स्वाहा॒ स्वाहा॒ स्वाङ्क्कृ॑तोस्यसि॒ स्वाङ्क्कृ॑त॒ꣳ स्वाहा॒ स्वाहा॒ स्वाङ्क्कृ॑तोसि॥२॥

स्वाङ्क्कृ॑तोस्यसि॒ स्वाङ्क्कृ॑त॒ꣳ स्वाङ्क्कृ॑तोसि॒ व्विश्श्वे॑ब्भ्यो॒ व्विश्श्वे॑ब्भ्योसि॒ स्वाङ्क्कृ॑त॒ꣳ स्वाङ्क्कृ॑तोसि॒ व्विश्श्वे॑ब्भ्यꣳ। स्वाङ्क्कृ॑त॒ऽ इति॒ स्वाम् कृ॑तꣳ। अ॒सि॒ व्विश्श्वे॑ब्भ्यो॒ व्विश्श्वे॑-ब्भ्योस्यसि॒ व्विश्श्वे॑ब्भ्यऽ इन्द्रि॒येब्भ्य॑ऽ इन्द्रि॒येब्भ्यो॒ व्विश्श्वे॑ब्भ्योस्यसि॒ व्विश्श्वे॑ब्भ्यऽ इन्द्रि॒येब्भ्य॑ः। व्विश्श्वे॑ब्भ्यऽ इन्द्रि॒येब्भ्य॑ऽ इन्द्रि॒येब्भ्यो॒ व्विश्श्वे॑ब्भ्यो॒ व्विश्श्वे॑ब्भ्यऽ इन्द्रि॒येब्भ्यो॑ दि॒व्व्येब्भ्यो॑ दि॒व्व्येब्भ्य॑ऽ इन्द्रि॒येब्भ्यो॒ व्विश्श्वे॑ब्भ्यो॒ व्विश्श्वे॑ब्भ्यऽ इन्द्रि॒ये-ब्भ्यो॑ दि॒व्व्येब्भ्य॑ः। इ॒न्द्रि॒येब्भ्यो॑ दि॒व्व्येब्भ्यो॑ दि॒व्व्येब्भ्य॑ऽ इन्द्रि॒येब्भ्य॑ऽ इन्द्रि॒ये-ब्भ्यो॑ दि॒व्व्येब्भ्य॒ꣳ पार्त्थि॑वेब्भ्य॒ꣳ पार्त्थि॑वेब्भ्यो दि॒व्व्येब्भ्य॑ऽ इन्द्रि॒येब्भ्य॑ऽ इन्द्रि॒ये-ब्भ्यो॑ दि॒व्व्येब्भ्य॒ꣳ पार्त्थि॑वेब्भ्यꣳ। दि॒व्व्येब्भ्य॒ꣳ पार्त्थि॑वेब्भ्य॒ꣳ पार्त्थि॑वेब्भ्यो दि॒व्व्ये-ब्भ्यो॑ दि॒व्व्येब्भ्य॒ꣳ पार्त्थि॑वेब्भ्यो॒ मनो॒ मन॒ꣳ पार्त्थि॑वेब्भ्यो दि॒व्व्येब्भ्यो॑ दि॒व्व्येब्भ्य॒ꣳ पार्त्थि॑वेब्भ्यो॒ मन॑ः। पार्त्थि॑वेब्भ्यो॒ मनो॒ मन॒ꣳ पार्त्थि॑वेब्भ्य॒ꣳ पार्त्थि॑वेब्भ्यो॒ मन॑-स्त्वा त्वा॒ मन॒ꣳ पार्त्थि॑वेब्भ्य॒ꣳ पार्त्थि॑वेब्भ्यो॒ मन॑स्त्वा। मन॑स्त्वा त्वा॒ मनो॒ मन॑-

स्त्वाष्ट्वष्टु त्वा मनो मनस्त्वाष्टु[1]। त्वाष्ट्वष्टु त्वा त्वाष्टु स्वाहा स्वाहाष्टु त्वा त्वाष्टु स्वाहा[2]। अष्टु स्वाहा स्वाहाष्ट्वष्टु स्वाहा त्वा त्वा स्वाहाष्ट्वष्टु स्वाहा त्वा। स्वाहा त्वा त्वा स्वाहा स्वाहा त्वा सुभव सुभव त्वा स्वाहा स्वाहा त्वा सुभव। त्वा सुभव सुभव त्वा त्वा सुभव सूर्य्याय सूर्य्याय सुभव त्वा त्वा सुभव सूर्य्याय। सुभव सूर्य्याय सूर्य्याय सुभव सुभव सूर्य्याय देवेब्भ्यो देवेब्भ्यः सूर्य्याय सुभव सुभव सूर्य्याय देवेब्भ्यः। सुभवेति सु भव। सूर्य्याय देवेब्भ्यो देवेब्भ्यः सूर्य्याय सूर्य्याय देवेब्भ्यस्त्वा त्वा देवेब्भ्यः सूर्य्याय सूर्य्याय देवेब्भ्यस्त्वा। देवेब्भ्यस्त्वा त्वा देवेब्भ्यो देवेब्भ्यस्त्वा मरीचिपेब्भ्यो मरीचिपेब्भ्यस्त्वा देवेब्भ्यो देवेब्भ्य-स्त्वा मरीचिपेब्भ्यः। त्वा मरीचिपेब्भ्यो मरीचिपेब्भ्यस्त्वा त्वा मरीचिपेब्भ्यो देव देव मरीचिपेब्भ्यस्त्वा त्वा मरीचिपेब्भ्यो देव। मरीचिपेब्भ्यो देव देव मरीचिपेब्भ्यो मरीचिपेब्भ्यो देवाꣳशोꣳशो देव मरीचिपेब्भ्यो मरीचिपेब्भ्यो देवाꣳशो। मरीचिपेब्भ्यऽ इति मरीचि पेब्भ्यः। देवाꣳशोꣳशो देव देवाꣳशो यस्म्मै यस्म्माऽ अꣳशो देव देवाꣳशो यस्म्मै। अꣳशो यस्म्मै यस्म्माऽ अꣳशोꣳशो यस्म्मै त्वा त्वा यस्म्माऽ अꣳशोꣳशो यस्म्मै त्वा। अꣳशोऽ इत्यꣳशो। यस्म्मै त्वा त्वा यस्म्मै यस्म्मै त्वेडऽ ईडे त्वा यस्म्मै यस्म्मै त्वेडे। त्वेडऽ ईडे त्वा त्वेडे ततदीडे त्वा त्वेडे तत्। ईडे ततदीडऽ ईडे तत्सत्यꣳ सत्यन्तदीडऽ ईडे तत्सत्यम्। तत्सत्यꣳ सत्यन्ततत्सत्यमुपरिप्प्रुतोपरिप्प्रुता सत्यन्ततत्सत्यमुपरिप्प्रुता[3]। सत्यमुपरिप्प्रुतोपरिप्प्रुता सत्यꣳ सत्यमुपरिप्प्रुता भङ्गेन भङ्गेनोपरिप्प्रुता सत्यꣳ सत्यमुपरिप्प्रुता भङ्गेन। उपरिप्प्रुता भङ्गेन

---

[1]. अष्टु अष्टु यहाँ स्वरे भाव्यन्तस्थाम्(वा.प्रा.४.४७) इस सूत्र से उकार अन्तस्थ व होता है।

[2]. सर्व विश्व मानुषाशाः स्वाहा वाजः पयो नमः (वा. प्रा. २.३९) ये पद आद्युदात होते हैं।

[3]. भाष्यकार उव्वट ने उपरिप्लुता पद माना है।

भ॒ङ्गेनोपरि॒प्प्रुतोपरि॒प्प्रुता भ॒ङ्गेन ह॒तो ह॒तो भ॒ङ्गेनोपरि॒प्प्रुतोपरि॒प्प्रुता भ॒ङ्गेन ह॒तः। उ॒परि॒प्प्रुतेत्युपरि प्रुता। भ॒ङ्गेन ह॒तो ह॒तो भ॒ङ्गेन भ॒ङ्गेन ह॒तो॒सावसौ ह॒तो भ॒ङ्गेन भ॒ङ्गेन ह॒तो॒सौ। ह॒तो॒सावसौ ह॒तो ह॒तो॒सौ फट्ट् फड॒सौ ह॒तो ह॒तो॒सौ फट्। अ॒सौ फट्ट् फड॒साव॒सौ फट्ट् प्रा॒णाय प्प्रा॒णाय॒ फड॒साव॒सौ फट्ट् प्रा॒णाय। फट्ट् प्रा॒णाय प्प्रा॒णाय॒ फट्ट् फट्ट् प्रा॒णाय त्वा त्वा प्प्रा॒णाय॒ फट्ट् फट्ट् प्रा॒णाय त्वा। प्रा॒णाय त्वा त्वा प्प्रा॒णाय प्प्रा॒णाय त्वा ध्या॒नाय ध्या॒नाय त्वा प्प्रा॒णाय प्प्रा॒णाय त्वा ध्या॒नाय। त्वा॒ ध्या॒नाय ध्या॒नाय त्वा त्वा ध्या॒नाय त्वा त्वा ध्या॒नाय त्वा त्वा ध्या॒नाय त्वा। ध्या॒नाय त्वा त्वा ध्या॒नाय ध्या॒नाय त्वा। ध्या॒नायेति वि आ॒नाय। त्वेति त्वा॥३॥

उ॒प॒या॒मगृहीतोस्यस्युपया॒मगृहीतऽ उपया॒मगृहीतोस्य॒न्तर॒न्तरस्युपया॒म-गृहीतऽ उपया॒मगृहीतोस्य॒न्तः। उ॒प॒या॒मगृहीत॒ऽ इत्युपया॒म गृहीतः। अ॒स्य॒न्त-र॒न्तरस्यस्य॒न्तर्ळ्यच्छ यच्छा॒न्तरस्यस्य॒न्तर्ळ्यच्छ[1]। अ॒न्तर्ळ्यच्छ यच्छा॒न्तर॒-न्तर्ळ्यच्छ मघवन्नमघवन्न्यच्छा॒न्तर॒न्तर्ळ्यच्छ मघवन्। य॒च्छ॒ म॒घ॒व॒न्न॒म॒घ॒व॒न्न्य॒च्छ॒ य॒च्छ॒ म॒घ॒व॒न्न्पाहि पा॒हि मघवन्न्यच्छ यच्छ मघवन्न्पा॒हि। म॒घ॒व॒न्न्पा॒हि पा॒हि मघवन्नमघवन्न्पा॒हि सोम॒ᳪ सोमम्पा॒हि मघवन्नमघवन्न्पा॒हि सोमम्। म॒घ॒व॒न्निति मघ व्वन्। पा॒हि सोम॒ᳪ सोमम्पा॒हि पा॒हि सोमम्। सोम॒मिति॒ सोमम्॥ उ॒रु॒ष्ष्य रायो॒ रायऽ उरु॒ष्ष्योरु॒ष्ष्य राय॒ऽ एष॒ऽ इष॒ऽ आ रायऽ उरु॒ष्ष्योरु॒ष्ष्य राय॒ऽ एषः[2]। राय॒ऽ एष॒ऽ इष॒ऽ आ रायो॒ राय॒ऽ एषो यजस्व यजु॒स्वेष॒ऽ आ रायो॒ राय॒ऽ एषो यजस्व। एषः। इषो यजस्व यजु॒स्वेष॒ऽ इषो यजस्व। य॒जु॒स्वेति यजस्व॥ ४॥

---

[1]. अन्तरनाद्युदात्तम् (वा. प्रा. १.१६२) आद्युदात्त न होने पर अ॒न्तः पद रिफितसंज्ञक होता है।

[2]. रायोऽपोषे(वा.प्रा.२.४२) इस सूत्र के अनुसार पोष बाद में न होने पर रायः पद आद्युदात्त होता है।

अ॒न्तस्ते॑ ते॒न्तर॒न्तस्ते॒ द्यावा॑पृथि॒वी द्यावा॑पृथि॒वी ते॒न्तर॒न्तस्ते॒ द्यावा॑पृथि॒वी । अ॒न्तरित्य॒न्तः॑ । ते॒ द्यावा॑पृथि॒वी द्यावा॑पृथि॒वी ते॑ ते॒ द्यावा॑पृथि॒वी द॑धामि दधामि॒ द्यावा॑पृथि॒वी ते॑ ते॒ द्यावा॑पृथि॒वी द॑धामि । द्यावा॑पृथि॒वी द॑धामि दधामि॒ द्यावा॑पृथि॒वी द्यावा॑पृथि॒वी द॑धाम्म्य॒न्तर॒न्तर्दँधामि॒ द्यावा॑पृथि॒वी द्यावा॑पृथि॒वी द॑धाम्म्य॒न्तः॑ । द्यावा॑पृथि॒वीऽ इति॒ द्यावा॑पृथि॒वी । द॒धा॒म्म्य॒न्तर॒न्तर्दँधामि दधाम्म्य॒न्तर्दँधामि दधाम्म्य॒न्तर्दँधामि दधाम्म्य॒न्तर्दँधामि । अ॒न्तर्दँधामि दधाम्म्य॒न्तर॒न्तर्दँधाम्म्यु॒रूरु द॑धाम्म्य॒न्तर॒न्तर्दँधाम्म्यु॒रु । द॒धा॒म्म्यु॒रूरु द॑धामि दधाम्म्यु॒र्व्व॒न्तरि॑क्षम॒न्तरि॑क्षमु॒रु द॑धामि दधाम्म्यु॒र्व्व॒न्तरि॑क्षम् । उ॒र्व्व॒न्तरि॑क्षम॒न्तरि॑क्षमु॒रूर्व्व॒न्तरि॑क्षम् । अ॒न्तरि॑क्ष॒मित्य॒न्तरि॑क्षम् ॥ स॒जूर्दे॒वेभि॒र्दे॒वेभि॑ः स॒जूः स॒जूर्दे॒वेभि॒रव॑रै॒रव॑रै॒र्दे॒वेभि॑ः स॒जूः स॒जूर्दे॒वेभि॒रव॑रैः । स॒जूरिति॑ स॒ जूः । दे॒वेभि॒रव॑रै॒रव॑रै॒र्दे॒वेभि॒र्दे॒वेभि॒रव॑रैः परै॑ः परै॒रव॑रै॒र्दे॒वेभि॒र्दे॒वेभि॒रव॑रैः परै॑ः । अव॑रैः परै॑ः परै॒रव॑रै॒रव॑रैः परै॑श्च च॒ परै॒रव॑रै॒रव॑रैः परै॑श्च । परै॑श्च च॒ परै॑ः परै॑श्चान्तर्य्या॒मेन्तर्य्या॒मे च॒ परै॑ः परै॑श्चान्तर्य्या॒मे[1] । चा॒न्त॒र्य्या॒मे॒न्तर्य्या॒मे च॑ चान्तर्य्या॒मे म॑घवन्नमघवन्नन्तर्य्या॒मे च॑ चान्तर्य्या॒मे म॑घवन् । अ॒न्त॒र्य्या॒मे म॑घवन्नमघवन्नन्तर्य्या॒मे॒न्तर्य्या॒मे म॑घवन्मादयस्व मादयस्व मघवन्नन्तर्य्या॒मे॒न्तर्य्या॒मे म॑घवन्मादयस्व । अ॒न्त॒र्य्या॒मऽ इत्य॑न्तः या॒मे । म॒घ॒व॒न्मा॒द॒य॒स्व॒ मा॒द॒य॒स्व॒ म॒घ॒व॒न्म॒घ॒व॒न्मा॒द॒य॒स्वो॒दा॒नायो॑दा॒नाय॑ मादयस्व मघवन्मघवन्मादयस्वोदा॒नाय॑ । म॒घ॒व॒न्निति॑ मघ वन् । मा॒द॒य॒स्वो॒दा॒नायो॑दा॒नाय॑ मादयस्व मादयस्वोदा॒नाय॑ त्वा त्वोदा॒नाय॑ मादयस्व मादयस्वोदा॒नाय॑ त्वा ॥ उ॒दा॒नाय॑ त्वा त्वोदा॒नायो॑दा॒नाय॑ त्वा । उ॒दा॒नायेत्यु॑त् आ॒नाय॑ । त्वेति॑ त्वा ॥५॥

---

[1]. अन्तर्य्यामे अन्तर्य्यामे यहाँ एदोद्भ्यां पूर्वमकारः(वा.प्रा.४.६२) इस सूत्र से एकार से परे अकार पूर्वरूप को प्राप्त करता है। तौ चेदुदात्तावनुदात्ते स्वरितौ(वा.प्रा.४.६३) के अनुसार एकार स्वरित होता है। एदोद्भ्यामकारो लुगभिनिहितः(वा.प्रा.१.११४) इस सूत्र से अभिनिहित स्वरित का विधान किया गया है।

आ वा॑यो व्वायु॒वा वा॑यो भूष भूष व्वायु॒वा वा॑यो भूष[1]। व्वा॒यो॒ भू॒ष॒ भू॒ष॒ व्वा॒यो॒ व्वा॒यो॒ भू॒ष॒ शु॒चि॒पा॒ः शु॒चि॒पा॒ भू॒ष॒ व्वा॒यो॒ व्वा॒यो॒ भू॒ष॒ शु॒चि॒पा॒ः। व्वा॒यो॒ऽ इति॑ वायो। भू॒ष॒ शु॒चि॒पा॒ः शु॒चि॒पा॒ भू॒ष॒ भू॒ष॒ शु॒चि॒पा॒ऽ उपोप॑ शुचिपा भूष भूष शुचिपा॒ऽ उप॑। शु॒चि॒पा॒ऽ उपोप॑ शुचिपाः शुचिपा॒ऽ उप॑ नो न॒ऽ उप॑ शुचिपाः शुचिपा॒ऽ उप॑ नः। शु॒चि॒पा॒ऽ इति॑ शुचि पाः। उप॑ नो न॒ऽ उपोप॑ नः स॒हस्र॑ꣳ स॒हस्र॑न्न॒ऽ उपोप॑ नः स॒हस्र॑म्। न॒ः स॒हस्र॑ꣳ स॒हस्र॑न्नो नः स॒हस्र॑न्ते ते स॒हस्र॑न्नो नः स॒हस्र॑न्ते। स॒हस्र॑न्ते ते स॒हस्र॑ꣳ स॒हस्र॑न्ते नि॒युतो॑ नि॒युत॑स्ते स॒हस्र॑ꣳ स॒हस्र॑न्ते नि॒युत॑ः । ते॒ नि॒युतो॑ नि॒युत॑स्ते ते नि॒युतो॑ व्विश्ववार व्विश्ववार नि॒युत॑स्ते ते नि॒युतो॑ व्विश्ववार। नि॒युतो॑ व्विश्ववार व्विश्ववार नि॒युतो॑ नि॒युतो॑ व्विश्ववार। नि॒युत॒ऽ इति॑ नि॒ युत॑ः । व्वि॒श्व॒वा॒रेति॑ विश्व व्वार॥ उपो॑ ते त॒ऽ उपो॒ऽ उपो॑ ते॒ऽ अन्धोन्ध॑स्त॒ऽ उपो॒ऽ उपो॑ ते॒ऽ अन्ध॑ः[2]। उपो॒ऽ इत्युपो॑। ते॒ऽ अन्धोन्ध॑स्ते ते॒ऽ अन्धो॒ मद्य॒म्मद्य॒मन्ध॑स्ते ते॒ऽ अन्धो॒ मद्य॑म्। अन्धो॒ मद्य॒म्मद्य॒मन्धोन्धो॒ मद्य॑मयाम्म्ययामि॒ मद्य॒मन्धोन्धो॒ मद्य॑मयामि। मद्य॑मयाम्म्ययामि॒ मद्य॒म्मद्य॑मयामि॒ यस्य॒ यस्या॑यामि॒ मद्य॒म्मद्य॑म-यामि॒ यस्य॑। अ॒या॒मि॒ यस्य॒ यस्या॑याम्म्ययामि॒ यस्य॑ देव दे॒व॒ यस्या॑याम्म्ययामि॒ यस्य॑ देव। यस्य॑ देव दे॒व॒ यस्य॒ यस्य॑ देव दधि॒षे द॑धि॒षे दे॑व॒ यस्य॒ यस्य॑ देव दधि॒षे। दे॒व॒ द॒धि॒षे द॑धि॒षे दे॑व देव दधि॒षे पू॒र्व्व॒पेय॑म्पूर्व्व॒पेय॑न्दधि॒षे दे॑व देव दधि॒षे पू॒र्व्व॒पेय॑म्। द॒धि॒षे पू॒र्व्व॒पेय॑म्पूर्व्व॒पेय॑न्दधि॒षे द॑धि॒षे पू॒र्व्व॒पेय॑ँव्वा॒यवे॑ व्वा॒यवे॑ पूर्व्व॒पेय॑न्दधि॒षे द॑धि॒षे पू॒र्व्व॒पेय॑ँव्वा॒यवे॑। पू॒र्व्व॒पेय॑ँव्वा॒यवे॑ व्वा॒यवे॑ पू॒र्व्व॒पेय॑म्पूर्व्व॒पेय॑ँव्वा॒यवे॑ त्वा त्वा व्वा॒यवे॑ पू॒र्व्व॒पेय॑-

---

[1]. उपसर्गपरौ यत्र यवकारौ पदादिगौ। ईषत्स्पृष्टौ ततो ज्ञेयावभियुध्य उपा यथा॥– व. शि. २०९.

[2]. वा.प्रा.४.८२. के अनुसार ते अन्धः यहाँ ते का एकार प्रकृतिभाव से रहता है। ओकारान्तनिपातानां व्युत्क्रमेऽस्ति प्रगृह्यता। यथा-उपो॑ ते तऽ उपो॒ऽ उपो॑ ते (पद.७.६ सं.७.७) – ज्यो. वृ. पृ.२२९.

म्पूर्व्वपेयँव्वायवे॑ त्वा। पूर्व्वपेयमिति॑ पूर्व्व पेय॑म्। व्वायवे॑ त्वा त्वा व्वायवे॑ व्वायवे॑ त्वा। त्वेति॑ त्वा॥६॥

इन्द्र॑वायूऽ इमऽ इमऽ इन्द्र॑वायूऽ इन्द्र॑वायूऽ इमे सुताः सुताऽ इमऽ इन्द्र॑वायूऽ इन्द्र॑वायूऽ इमे सुताः। इन्द्र॑वायूऽ इतीन्द्र॑वायू। इमे सुताः सुताऽ इमऽ इमे सुताऽ उपोप॑ सुताऽ इमऽ इमे सुताऽ उप॑। सुताऽ उपोप॑ सुताः सुताऽ उप प्प्रयो॑भिः प्प्रयो॑भिरुप॑ सुताः सुताऽ उप प्प्रयो॑भिः। उप प्प्रयो॑भिः प्प्रयो॑भिरुपोप प्प्रयो॑भिरा ग॑तङ्गतमा प्प्रयो॑भिरुपोप प्प्रयो॑भिरा ग॑तम्। प्रयो॑भिरा ग॑तङ्गतमा प्प्रयो॑भिः प्प्रयो॑भिरा ग॑तम्। प्रयो॑भिरिति प्प्रय॑ः भिः। आ ग॑तम्। गतमिति॑ गतम्॥ इन्द॑वो वाँव्वामिन्द॑वऽ इन्द॑वो वामुशन्त्युशन्ति॑ वामिन्द॑वऽ इन्द॑वो वामुशन्ति॑। व्वामुशन्त्युशन्ति॑ वाँव्वामुशन्ति हि ह्युशन्ति॑ वाँव्वामुशन्ति हि[1]। उशन्ति हि ह्युशन्त्युशन्ति हि। हीति हि॥ व्वायवऽ इन्द्रवायुब्भ्या॑मिन्द्रवायुब्भ्याँव्वायवे॑ व्वायवऽ इन्द्रवायुब्भ्यान्त्वा त्वेन्द्रवायुब्भ्याँव्वायवे॑ व्वायवऽ इन्द्रवायुब्भ्या॑न्त्वा[2]। इन्द्रवायुब्भ्या॑न्त्वा त्वेन्द्रवायुब्भ्या॑मिन्द्रवायुब्भ्या॑न्त्वैषऽ एष त्वेन्द्रवायुब्भ्या॑मिन्द्रवायुब्भ्या॑न्त्वैषः। इन्द्रवायुब्भ्यामिती॑न्द्रवायु भ्या॑म्। त्वैषऽ एष त्वा॑ त्वैष ते॑ तऽ एष त्वा॑ त्वैष ते॑। एष ते॑ तऽ एषऽ एष ते योनि॑र्व्योनि॑स्तऽ एषऽ एष ते योनि॑ः। ते योनि॑र्व्योनि॑स्ते ते योनि॑ः सजोषो॑ब्भ्याᳪ सजोषो॑ब्भ्याँय्योनि॑स्ते ते योनि॑ः सजोषो॑ब्भ्याम्। योनि॑ः सजोषो॑ब्भ्याᳪ सजोषो॑ब्भ्याँय्योनिर्व्योनि॑ः सजोषो॑ब्भ्यान्त्वा त्वा सजोषो॑ब्भ्याँय्योनिर्व्योनि॑ः सजोषो॑ब्भ्यान्त्वा। सजोषो॑-

---

[1]. उत्तरेऽपि (वा. मा. ६.१६) के अनुसार हि पद परे रहते उशन्ति॑ पद अपने प्रकृति स्वर से युक्त होता है।

[2]. देवताद्वन्द्वानि चानामन्त्रितानि(वा.प्रा. २.४८) इस सूत्र के अनुसार इन्द्र॑वायू यह पद आमन्त्रित होने से द्विरुदात्त नहीं है। इन्द्रवायुभ्या॑म् यह पद द्वन्द्वं चेन्द्रसोमपूर्वं पूषाग्निवायुषु(वा.प्रा. २.५५) इस सूत्र के अनुसार अन्तोदात्त है। यह सूत्र पूर्वोक्त सूत्र का अपवाद है।

ब्भ्यान्त्वा त्वा सुजोषोब्भ्याꣳ सुजोषोब्भ्यान्त्वा। सुजोषोब्भ्यामिति सुजोषः÷
भ्याम्। त्वेति त्वा॥७॥

अयँव्वाँव्वामयमयँव्वाम्मित्रावरुणा मित्रावरुणा वामयमयँव्वाम्मित्रावरुणा।
व्वाम्मित्रावरुणा मित्रावरुणा वाँव्वाम्मित्रावरुणा सुतः सुतो मित्रावरुणा वाँव्वा-
म्मित्रावरुणा सुतः। मित्रावरुणा सुतः सुतो मित्रावरुणा मित्रावरुणा सुतः
सोमꣳ सोमः÷ सुतो मित्रावरुणा मित्रावरुणा सुतः सोमः÷। सुतः सोमꣳ सोमः÷
सुतः सुतः सोमऽ ऋतावृधऽ ऋतवृधा सोमः÷ सुतः सुतः सोमऽ ऋतावृधा[1]।
सोमऽ ऋतावृधऽ ऋतवृधा सोमꣳ सोमऽ ऋतावृधा। ऋतवृधेत्यृत व्वृधा॥ ममेदि-
हमम ममेदिहेहेद्ममम ममेदिह। इदिहेहेदिदिह श्श्रुतꣳ श्रुतमिहेदिदिह श्श्रुतम्[2]।
इह श्श्रुतꣳ श्रुतमिहेह श्श्रुतꣳ हवꣳ हवꣳ श्रुतमिहेह श्श्रुतꣳ हवम्। श्रुतꣳ हवꣳ
हवꣳ श्रुतꣳ श्रुतꣳ हवम्। हवमिति हवम्॥ मित्रावरुणाब्भ्यान्त्वा त्वा मित्रा-
वरुणाब्भ्याम्मित्रावरुणाब्भ्यान्त्वा। त्वेति त्वा॥८॥

राया व्वयँव्वयꣳ राया राया व्वयꣳ सꣳसवाꣳसः÷ ससवाꣳसो व्वयꣳ राया
राया व्वयꣳ सꣳसवाꣳसः÷। व्वयꣳ सꣳसवाꣳसः÷ ससवाꣳसो व्वयँव्वयꣳ सꣳसवाꣳसो
मदेम मदेम ससवाꣳसो व्वयँव्वयꣳ सꣳसवाꣳसो मदेम। ससवाꣳसो मदेम मदेम
ससवाꣳसः÷ ससवाꣳसो मदेम हव्येन हव्येन मदेम ससवाꣳसः÷ ससवाꣳसो
मदेम हव्येन। ससवाꣳसऽ इति सस व्वाꣳसः÷। मदेम हव्येन हव्येन मदेम मदेम
हव्येन देवा देवा हव्येन मदेम मदेम हव्येन देवाः। हव्येन देवा देवा हव्येन हव्येन
देवा यवसेन यवसेन देवा हव्येन हव्येन देवा यवसेन। देवा यवसेन यवसेन देवा
देवा यवसेन गावो गावो यवसेन देवा देवा यवसेन गावः÷। यवसेन गावो गावो

---

[1]. ऋतवृधा यहाँ वा.प्रा.३.९७. के अनुसार वकार बाद में होने से ऋत इस पदावयव (पूर्वपद) का ह्रस्व स्वर दीर्घ होता है।

[2]. इहपूर्वं श्रुतम् (वा. प्रा. २.१४) इह से परे स्थित श्रुतम् पद अनुदात्त होता है।

यवसेन यवसेन गावः। गावऽ इति गावः॥ तान्धेनुन्धेनुन्तान्तान्धेनुम्मित्रा-
वरुणा मित्रावरुणा धेनुन्तान्तान्धेनुम्मित्रावरुणा। धेनुम्मित्रावरुणा मित्रावरुणा
धेनुन्धेनुम्मित्रावरुणा युवँय्युवम्मित्रावरुणा धेनुन्धेनुम्मित्रावरुणा युवम्।
मित्रावरुणा युवँय्युवम्मित्रावरुणा मित्रावरुणा युवन्नो नो युवम्मित्रावरुणा मित्रा-
वरुणा युवन्नः। युवन्नो नो युवँय्युवन्नो विश्वाहा विश्वाहा नो युवँय्युवन्नो विश्वाहा
। नो विश्वाहा विश्वाहा नो नो विश्वाहा धत्तन्धत्तँविश्वाहा नो नो विश्वाहा धत्तम्।
विश्वाहा धत्तन्धत्तँविश्वाहा विश्वाहा धत्तमनपस्फुरन्तीमनपस्फुरन्तीन्धत्तँवि-
श्वाहा विश्वाहा धत्तमनपस्फुरन्तीम्। धत्तमनपस्फुरन्तीमनपस्फुरन्तीन्धत्त-
न्धत्तमनपस्फुरन्तीमृतायुभ्यामृतयुभ्यामनपस्फुरन्तीन्धत्तन्धत्तमनपस्फु-
रन्तीमृतायुभ्याम्[1]। अनपस्फुरन्तीमृतायुभ्यामृतयुभ्यामनपस्फुरन्तीम-
नपस्फुरन्तीमृतायुभ्यान्त्वा त्वऽ ऋतयुभ्यामनपस्फुरन्तीमनपस्फुरन्ती-
मृतायुभ्यान्त्वा। अनपस्फुरन्तीमित्यनप स्फुरन्तीम्। ऋतायुभ्यान्त्वा त्वऽ
ऋतयुभ्यामृतायुभ्यान्त्वा। ऋतयुभ्यामित्यृतयु भ्याम्। त्वेति त्वा॥९॥

या वाँव्वाँय्या या वाङ्कशा कशा वाँय्या या वाङ्कशा। वाङ्कशा कशा वाँव्वाङ्क-
शा मधुमती मधुमती कशा वाँव्वाङ्कशा मधुमती[2]। कशा मधुमती मधुमती कशा
कशा मधुमत्यश्विनाश्विना मधुमती कशा कशा मधुमत्यश्विना। मधु-
मत्यश्विनाश्विना मधुमती मधुमत्यश्विना सूनृतावती सूनृतावत्यश्विना मधुमती
मधुमत्यश्विना सूनृतावती। मधुमतीति मधु मती। अश्विना सूनृतावती सूनृता-
वत्यश्विनाश्विना सूनृतावती। सूनृतावतीति सूनृता वती॥ तया यज्ञँय्यज्ञन्त-

[1]. ऋतयुभ्याम् यहाँ वा.प्रा.३.११२. के अनुसार यकार बाद में होने से त का स्वर दीर्घ होता है।

[2]. वा. प्रा. २.१७. के अनुसार कोई भी पद पूर्व में होने पर संबोधन पद अनुदात होता है, यदि वह नानार्थक वाचक न हो एवं पाद के प्रारम्भ में न हो। यहाँ मधुमती पाद के प्रारम्भ में होने के कारण आद्युदात्त है।

या तया यज्ञम्मिमिक्षतम्मिमिक्षतँय्यज्ञन्तया तया यज्ञम्मिमिक्षतम्। यज्ञम्मिमिक्षतम्मिमिक्षतँय्यज्ञँय्यज्ञम्मिमिक्षतम्। मिमिक्षतमिति मिमिक्षतम्॥ अश्विभ्यान्त्वा त्वाश्विभ्यामश्विभ्यान्त्वा माद्धीभ्याम्माद्धी-भ्यान्त्वाश्विभ्यामश्विभ्यान्त्वा माद्धीभ्याम्। अश्विभ्यामित्यश्वि भ्याम्। त्वा माद्धीभ्याम्माद्धीभ्यान्त्वा त्वा माद्धीभ्यान्त्वा त्वा माद्धीभ्यान्त्वा त्वा माद्धीभ्यान्त्वा। माद्धीभ्यान्त्वा त्वा माद्धीभ्याम्माद्धीभ्यान्त्वा। त्वेति त्वा॥ १०॥

तम्प्रत्नथा प्प्रत्नथा तन्तम्प्रत्नथा पूर्व्वथा पूर्व्वथा प्प्रत्नथा तन्तम्प्रत्नथा पूर्व्वथा। प्रत्नथा पूर्व्वथा पूर्व्वथा प्प्रत्नथा प्प्रत्नथा पूर्व्वथा व्विश्वथा व्विश्वथा पूर्व्वथा प्प्रत्नथा प्प्रत्नथा पूर्व्वथा व्विश्वथा। प्रत्नथेति प्प्रत्न था। पूर्व्वथा व्विश्वथा व्विश्वथा पूर्व्वथा पूर्व्वथा व्विश्वथेमथेमथा व्विश्वथा पूर्व्वथा पूर्व्वथा व्विश्वथेमथा। पूर्व्वथेति पूर्व्व था। व्विश्वथेमथेमथा व्विश्वथा व्विश्वथेमथा ज्येष्ठतातिञ्ज्येष्ठतातिमिमथा व्विश्वथा व्विश्वथेमथा ज्येष्ठतातिम्। व्विश्वथेति व्विश्व था। इमथा ज्येष्ठतातिञ्ज्येष्ठताति-मिमथेमथा ज्येष्ठतातिम्बर्हिषदम्बर्हिसदञ्ज्येष्ठतातिमिमथेमथा ज्येष्ठतातिम्ब-र्हिषदम्[1]। इमथेतीम था[2]। ज्येष्ठतातिम्बर्हिषदम्बर्हिसदञ्ज्येष्ठतातिञ्ज्येष्ठ-तातिम्बर्हिषदँ स्वर्व्विदँ स्वर्व्विदम्बर्हिसदञ्ज्येष्ठतातिञ्ज्येष्ठतातिम्बर्हिषदँ स्वर्व्विदम्। ज्येष्ठतातिमिति ज्ज्येष्ठ तातिम्। बर्हिषदँ स्वर्व्विदँ स्वर्व्विदम्बर्हिस-दम्बर्हिषदँ स्वर्व्विदम्। बर्हिसदमिति बर्हि सदम्। स्वर्व्विदमिति स्वः व्विदम्॥ प्रतीचीनँव्वृजनँव्वृजनम्प्रतीचीनम्प्रतीचीनँव्वृजनन्दोहसे दोहसे व्वृजनम्प्रतीचीन-

1. करेफाभ्यां च(वा.प्रा.३.५८) इस सूत्र के अनुसार बर्हिसदम् पद में रेफ से बाद में स्थित सकार षकार होता है।

2. प्रत्नपूर्वविश्वेमर्तुभ्यस्था (वा. प्रा. ५.१२) प्रस्तुत सूत्र के अनुसार इस कण्डिका में प्रत्न, पूर्व, विश्व एवं इम परे स्थित था प्रत्यय को पृथक् किया जाता है।

म्प्रतीचीनँब्वृजनन्दोहसे। ब्वृजनन्दोहसे दोहसे ब्वृजनँब्वृजनन्दोहसे धुनिन्धुनि-न्दोहसे ब्वृजनँब्वृजनन्दोहसे धुनिम्। दोहसे धुनिन्धुनिन्दोहसे दोहसे धुनिमाशु-माशुन्धुनिन्दोहसे दोहसे धुनिमाशुम्। धुनिमाशुमाशुन्धुनिन्धुनिमाशुञ्जयन्त-ञ्जयन्तमाशुन्धुनिन्धुनिमाशुञ्जयन्तम्। आशुञ्जयन्तञ्जयन्तमाशुमाशुञ्जयन्तम-न्न्वनु जयन्तमाशुमाशुञ्जयन्तमनु। जयन्तमन्न्वनु जयन्तञ्जयन्तमनु यासु यास्वनु जयन्तञ्जयन्तमनु यासु। अनु यासु यास्वन्न्वनु यासु ब्वर्द्धसे ब्वर्द्धसे यास्व-न्न्वनु यासु ब्वर्द्धसे। यासु ब्वर्द्धसे ब्वर्द्धसे यासु यासु ब्वर्द्धसे। ब्वर्द्धसऽ इति वर्द्धसे ॥ शण्डाय त्वा त्वा शण्डाय शण्डाय त्वा ब्वीरताँब्वीरतान्त्वा शण्डाय शण्डाय त्वा ब्वीरताम्[1]। त्वा ब्वीरताँब्वीरतान्त्वा त्वा ब्वीरताम्पाहि पाहि ब्वीरतान्त्वा त्वा ब्वीरताम्पाहि। ब्वीरताम्पाहि पाहि ब्वीरताँब्वीरताम्पाह्यपमृष्टोपमृष्टः पाहि ब्वीरताँ-ब्वीरताम्पाह्यपमृष्टः। पाह्यपमृष्टोपमृष्टः पाहि पाह्यपमृष्टः शण्डः शण्डोपमृष्टः पाहि पाह्यपमृष्टः शण्डः। अपमृष्टः शण्डः शण्डोपमृष्टोपमृष्टः शण्डो देवा देवाः शण्डोपमृष्टोपमृष्टः शण्डो देवाः। अपमृष्टऽ इत्यप मृष्टः। शण्डो देवा देवाः शण्डः शण्डो देवास्त्वा त्वा देवाः शण्डः शण्डो देवास्त्वा। देवास्त्वा त्वा देवा देवास्त्वा शुक्रपाः शुक्रपास्त्वा देवा देवास्त्वा शुक्रपाः। त्वा शुक्रपाः शुक्रपास्त्वा त्वा शुक्रपाः प्प्र प्प्र शुक्रपास्त्वा त्वा शुक्रपाः प्प्र। शुक्रपाः प्प्र प्प्र शुक्रपाः शुक्रपाः प्प्र णयन्तु नयन्तु प्प्र शुक्रपाः शुक्रपाः प्प्र णयन्तु। शुक्रपाऽ इति शुक्र पाः। प्र णयन्तु नयन्तु प्प्र प्प्र णयन्त्वनाधृष्टानाधृष्टा नयन्तु प्प्र प्प्र णयन्त्वनाधृष्टा। नयन्त्वनाधृष्टानाधृष्टा नयन्तु नयन्त्वनाधृष्टास्यस्यनाधृष्टा नयन्तु नयन्त्वनाधृष्टासि। अनाधृष्टास्यस्यनाधृष्टानाधृष्टासि। असीत्यसि॥११॥

---

1. स्वरात् संयोगादिर्द्विरुच्यते सर्वत्र(वा.प्रा.४.१०१) इस सूत्र से शण्डाय इस पद में प्रतीयमान णकार की द्विरुक्ति स्ववर्गीये चानुत्तमे(वा.प्रा.४.११७) से बाधित होती है।

सुवीरो वीरान्वीरान्त्सुवीरः सुवीरो वीरान्प्रजनयंन्प्रजनयंन्वीरान्त्सुवीरः सुवीरो वीरान्प्रजनयन्। सुवीरऽ इति सु वीरः। वीरान्प्रजनयन्प्रजनयंन्वीरान्वीरान्प्रजनयन्परि परि प्रजनयंन्वीरान्वीरान्प्रजनयन्परि। प्रजनयन्परि परि प्रजनयंन्प्रजनयन्परीहीहि परि प्रजनयंन्प्रजनयन्परीहि। प्रजनयन्निति प्र जनयन्। परीहीहि परि परीह्यभ्यभीहि परि परीह्यभि। इह्यभ्यभीहीह्यभि रायो रायोभीहीह्यभि रायः। अभि रायो रायोऽभ्यभि रायस्पोषेण पोषेण रायोऽभ्यभि रायस्पोषेण[1]। रायस्पोषेण पोषेण रायो रायस्पोषेण यजमानँय्यजमानम्पोषेण रायो रायस्पोषेण यजमानम्। पोषेण यजमानँय्यजमानम्पोषेण पोषेण यजमानम्। यजमानमिति यजमानम्॥ सञ्जग्मानो दिवा दिवा संञ्जग्मानः संञ्जग्मानो दिवा पृथिव्या पृथिव्या दिवा संञ्जग्मानः संञ्जग्मानो दिवा पृथिव्या[2]। सञ्जग्मानऽ इति सम् जग्मानः। दिवा पृथिव्या पृथिव्या दिवा दिवा पृथिव्या शुक्रः शुक्रः पृथिव्या दिवा दिवा पृथिव्या शुक्रः। पृथिव्या शुक्रः शुक्रः पृथिव्या पृथिव्या शुक्रः शुक्रशोचिषा शुक्रशोचिषा शुक्रः पृथिव्या पृथिव्या शुक्रः शुक्रशोचिषा। शुक्रः शुक्रशोचिषा शुक्रशोचिषा शुक्रः शुक्रः शुक्रशोचिषा निरस्तो निरस्तः शुक्रशोचिषा शुक्रः शुक्रः शुक्रशोचिषा निरस्तः। शुक्रशोचिषा निरस्तो निरस्तः शुक्रशोचिषा शुक्रशोचिषा निरस्तः शण्डः शण्डो निरस्तः शुक्रशोचिषा शुक्रशोचिषा निरस्तः शण्डः। शुक्रशोचिषेति शुक्र शोचिषा। निरस्तः शण्डः शण्डो निरस्तो निरस्तः शण्डः शुक्रस्य शुक्रस्य शण्डो निरस्तो निरस्तः शण्डः शुक्रस्य। निरस्तऽ इति निः अस्तः। शण्डः शुक्रस्य शुक्रस्य शण्डः शण्डः

[1]. रायः सहसः पोषपुत्रयोः (वा. प्रा. ३.२५) पोष एवं पुत्र परे होने पर क्रमशः रायः एवं सहसः का विसर्जनीय सकार हो जाता है।
[2]. वा. प्रा. ४.२८. के अनुसार यहाँ पृथिव्या पद स्वरान्त है।

शुक्रस्याधिष्ठानमधिस्त्थानꣳ शुक्रस्य शण्डꣳ शण्डं॑ शुक्रस्याधिष्ठानम्। शुक्रस्याधिष्ठानमधिस्त्थानꣳ शुक्रस्य शुक्रस्याधिष्ठानमस्यस्यधिस्त्थानꣳ शुक्रस्य शुक्रस्याधिष्ठानमसि। अधिष्ठानमस्यस्यधिस्त्थानमधिष्ठानमसि। अधिस्त्थानमित्यधि स्थानम्[1]। असीत्यसि॥१२॥

अच्छिन्नस्य ते तेच्छिन्नस्याच्छिन्नस्य ते देव देव तेच्छिन्नस्याच्छिन्नस्य ते देव। ते देव देव ते ते देव सोम सोम देव ते ते देव सोम। देव सोम सोम देव देव सोम सुवीर्य्यस्य सुवीर्य्यस्य सोम देव देव सोम सुवीर्य्यस्य। सोम सुवीर्य्यस्य सुवीर्य्यस्य सोम सोम सुवीर्य्यस्य रायो रायः सुवीर्य्यस्य सोम सोम सुवीर्य्यस्य रायः। सुवीर्य्यस्य रायो रायः सुवीर्य्यस्य सुवीर्य्यस्य रायस्प्पोषस्य पोषस्य रायः सुवीर्य्यस्य सुवीर्य्यस्य रायस्प्पोषस्य। सुवीर्य्यस्येति सु वीर्य्यस्य। राय-स्प्पोषस्य पोषस्य रायो रायस्प्पोषस्य ददितारो ददितारः पोषस्य रायो रायस्प्पोषस्य ददितारः। पोषस्य ददितारो ददितारः पोषस्य पोषस्य ददितारः स्याम स्याम ददितारः पोषस्य पोषस्य ददितारः स्याम। ददितारः स्याम स्याम ददितारो ददितारः स्याम। स्यामेति स्याम॥ सा प्प्रथमा प्प्रथमा सा सा प्प्रथमा सँस्कृतिः सँस्कृतिः प्प्रथमा सा सा प्प्रथमा सँस्कृतिः[2]। प्रथमा सँस्कृतिः सँस्कृतिः प्प्रथमा प्प्रथमा सँस्कृतिर्व्विश्ववारा व्विश्ववारा सँस्कृतिः प्प्रथमा प्प्रथमा सँस्कृतिर्व्विश्ववारा। सँस्कृतिर्व्विश्ववारा व्विश्ववारा सँस्कृतिः सँस्कृतिर्व्विश्ववारा स स व्विश्ववारा सँस्कृतिः सँस्कृतिर्व्विश्ववारा सः। व्विश्ववारा स स व्विश्ववारा व्विश्ववारा स प्प्रथमः प्प्रथमः स व्विश्ववारा व्विश्ववारा स प्प्रथमः

---

1. वा.प्रा.४.१९३. के अनुसार यहाँ स्थितोपस्थित पाठ करना चाहिये।

2. सम् कृतिः यहाँ समन्तः पदे कखपफेष्वनूष्मपरेषु (वा. प्रा. ४.८) इस सूत्र से मकार सकार हो जाता है तथा उपधा का अनुनासिकत्व। अनुनासिकत्व वर्ण का धर्म है, अनुस्वार न होने से यहाँ ꣳकार की सम्भावना नहीं है। वा. प्रा. ५.४३. के अनुसार उपधाभूत स्वर के अनुनासिक होने से यह सँस्कृतिः पद पृथक् नहीं किया जाता है।

। व्विश्श्ववारेति विश्श्व व्वारा। स प्प्रथमः प्प्रथमः स स प्प्रथमो व्वरुणो व्वरुणः प्प्रथमः स स प्प्रथमो व्वरुणः। प्रथमो व्वरुणो व्वरुणः प्प्रथमः प्प्रथमो व्वरुणो मित्त्रो मित्त्रो व्वरुणः प्प्रथमः प्प्रथमो व्वरुणो मित्त्रः। व्वरुणो मित्त्रो मित्त्रो व्वरुणो व्वरुणो मित्त्रोऽ अग्ग्निरग्ग्निर्म्मित्त्रो व्वरुणो व्वरुणो मित्त्रोऽ अग्ग्निः। मित्त्रोऽ अग्ग्निरग्ग्निर्म्मित्त्रो मित्त्रोऽ अग्ग्निः। अग्ग्निरित्यग्ग्निः ॥१३॥

स प्प्रथमः प्प्रथमः स स प्प्रथमो बृहस्स्पतिर्बृहस्स्पतिः प्प्रथमः स स प्प्रथमो बृहस्स्पतिः। प्रथमो बृहस्स्पतिर्बृहस्स्पतिः प्प्रथमः प्प्रथमो बृहस्स्पतिश्चिकित्त्वाँश्चिकित्त्वान्बृहस्स्पतिः प्प्रथमः प्प्रथमो बृहस्स्पतिश्चिकित्त्वान्। बृहस्स्पतिश्चिकित्त्वाँश्चिकित्त्वान्बृहस्स्पतिर्बृहस्स्पतिश्चिकित्त्वाँस्तस्स्मै तस्स्मै चिकित्त्वान्बृहस्स्पतिर्बृहस्स्पतिश्चिकित्त्वाँस्तस्स्मै। चिकित्त्वाँस्तस्स्मै तस्स्मै चिकित्त्वाँश्चिकित्त्वाँस्तस्स्माऽ इन्द्रायेन्द्राय तस्स्मै चिकित्त्वाँश्चिकित्त्वाँस्तस्स्माऽ इन्द्राय। तस्स्माऽ इन्द्रायेन्द्राय तस्स्मै तस्स्माऽ इन्द्राय सुतꣳ सुतमिन्द्राय तस्स्मै तस्स्माऽ इन्द्राय सुतम्। इन्द्राय सुतꣳ सुतमिन्द्रायेन्द्राय सुतमा जुहोत जुहोता सुतमिन्द्रायेन्द्राय सुतमा जुहोत। सुतमा जुहोत जुहोता सुतꣳ सुतमा जुहोत स्वाहा स्वाहा जुहोता सुतꣳ सुतमा जुहोत स्वाहा। आ जुहोत। जुहोत स्वाहा स्वाहा जुहोत जुहोत स्वाहा। स्वाहेति स्वाहा॥ तृम्पन्तु होत्त्रा होत्त्रास्तृम्पन्तु तृम्पन्तु होत्त्रा मद्ध्वो मद्ध्वो होत्त्रास्तृम्पन्तु तृम्पन्तु होत्त्रा मद्ध्वः[1]। होत्त्रा मद्ध्वो मद्ध्वो होत्त्रा होत्त्रा मद्ध्वो या या मद्ध्वो होत्त्रा होत्त्रा मद्ध्वो याः। मद्ध्वो या या मद्ध्वो मद्ध्वो याः स्स्विष्टाः स्स्विष्टा या मद्ध्वो मद्ध्वो याः स्स्विष्टाः। याः स्स्विष्टाः स्स्विष्टा या याः स्स्विष्टा या याः स्स्विष्टा या याः स्स्विष्टा याः। स्स्विष्टा या याः

[1]. तृम्पन्तु यहाँ वा. प्रा. ३.९३. के अनुसार नकार प्रकृति भाव से रहता है। होत्रास्तृम्पन्तु यहाँ ऊष्मान्तस्थाभ्यश्च स्पर्शः(वा.प्रा.४.१०३) इस सूत्र से सकार से परे तकार का द्वित्व प्राप्त है परन्तु परवर्ती सूत्र ऋवर्णे(वा.प्रा.४.११२) से द्वित्व का निषेध है।

स्विष्टाः स्विष्टा याः सुप्रीताः सुप्रीता याः स्विष्टाः स्विष्टा याः सुप्रीताः। स्विष्टाऽ इति सु इष्टाः। याः सुप्रीताः सुप्रीता या याः सुप्रीताः सुहुताः सुहुताः सुप्रीता या याः सुप्रीताः सुहुताः। सुप्रीताः सुहुताः सुहुताः सुप्रीताः सुप्रीताः सुहुता यद्यत्सुहुताः सुप्रीताः सुप्रीताः सुहुता यत्। सुप्रीताऽ इति सु प्रीताः। सुहुता यद्यत्सुहुताः सुहुता यत्स्वाहा स्वाहा यत्सुहुताः सुहुता यत्स्वाहा। सुहुताऽ इति सु हुताः। यत्स्वाहा स्वाहा यद्यत्स्वाहायाडयाट्ट् स्वाहा यद्यत्स्वाहायाट्। स्वाहायाडयाट्ट् स्वाहा स्वाहायाडग्नीदग्नीडयाट्ट् स्वाहा स्वाहायाडग्नीत्। अयाडग्नीदग्नीदयाडयाडग्नीत्। अग्नीदित्यग्नीत्॥१४॥

अयँव्वेनो व्वेनोयमयँव्वेनश्चोदयच्चोदयद्वेनोयमयँव्वेनश्चोदयत्। व्वेनश्चोदयच्चोदयद्वेनो व्वेनश्चोदयत्पृश्निंगर्भाः पृश्निंगर्भाश्चोदयद्वेनो व्वेनश्चोदयत्पृश्निंगर्भाः। चोदयत्पृश्निंगर्भाः पृश्निंगर्भाश्चोदयच्चोदयत्पृश्निंगर्भा ज्ज्योतिर्ज्जरायुर्ज्ज्योतिर्ज्जरायुः पृश्निंगर्भाश्चोदयच्चोदयत्पृश्निंगर्भा ज्ज्योतिर्ज्जरायुः। पृश्निंगर्भा ज्ज्योतिर्ज्जरायुर्ज्ज्योतिर्ज्जरायुः पृश्निंगर्भाः पृश्निंगर्भा ज्ज्योतिर्ज्जरायू रजसो रजसो ज्ज्योतिर्ज्जरायुः पृश्निंगर्भाः पृश्निंगर्भा ज्ज्योतिर्ज्जरायू रजसः। पृश्निंगर्भाऽ इति पृश्नि गर्भाः। ज्ज्योतिर्ज्जरायू रजसो रजसो ज्ज्योतिर्ज्जरायुर्ज्ज्योतिर्ज्जरायू रजसो व्विमाने व्विमाने रजसो ज्ज्योतिर्ज्जरायुर्ज्ज्योतिर्ज्जरायू रजसो व्विमाने। ज्ज्योतिर्ज्जरायुरिति ज्ज्योतिः जरायुः। रजसो व्विमाने व्विमाने रजसो रजसो व्विमाने। व्विमानऽ इति वि माने॥ इममपामपामिममिममपाᳪं सङ्गमे सङ्गमेपामिममिममपाᳪं सङ्गमे[1]। अपाᳪं सङ्गमे सङ्गमेपामपाᳪं सङ्गमे सूर्यस्य

[1]. सङ्गमे अपाम् यहाँ एदोङ्भ्यां पूर्वमकारः (वा. प्रा. ४.६२) से अकार पूर्वरूप हो जाता है। तौ चेदुदात्तावनुदात्ते स्वरितौ (वा. प्रा. ४.६३) से स्वरित स्वर की प्राप्ति है। एदोङ्भ्यामकारो लुगभिनिहितः(वा.प्रा.१.११४) इस सूत्र से अभिनिहित नामक स्वरित का विधान है।

सूर्य्यस्य सङ्गमेपामपा॑ सङ्गमे सूर्य्यस्य। सङ्गमे सूर्य्यस्य सूर्य्यस्य सङ्गमे सङ्गमे सूर्य्यस्य शिशुः शिशुः सूर्य्यस्य सङ्गमे सङ्गमे सूर्य्यस्य शिशुम्। सङ्गमऽ इति सम् गमे। सूर्य्यस्य शिशुः शिशुः सूर्य्यस्य सूर्य्यस्य शिशुन्न न शिशुः सूर्य्यस्य सूर्य्यस्य शिशुन्न। शिशुन्न न शिशुः शिशुन्न विप्रा विप्रा न शिशुः शिशुन्न विप्राः। न विप्रा विप्रा न न विप्रा मतिभिर्म्मतिभिर्विप्रा न न विप्रा मतिभिः। विप्रा मतिभिर्म्मतिभिर्विप्रा विप्रा मतिभी रिहन्ति रिहन्ति मतिभिर्विप्रा विप्रा मतिभी रिहन्ति। मतिभी रिहन्ति रिहन्ति मतिभिर्म्मतिभी रिहन्ति। मतिभिरिति मति भिः। रिहन्तीति रिहन्ति॥ मर्क्कीय त्वा त्वा मर्क्कीय मर्क्कीय त्वा। त्वेति त्वा॥१५॥

मनो न न मनो मनो न येषु येषु न मनो मनो न येषु। न येषु येषु न न येषु हवनेषु हवनेषु येषु न न येषु हवनेषु। येषु हवनेषु हवनेषु येषु येषु हवनेषु तिग्ममन्तिग्ममः हवनेषु येषु येषु हवनेषु तिग्ममम्। हवनेषु तिग्ममन्तिग्ममः हवनेषु हवनेषु तिग्मँविपो विपस्तिग्ममः हवनेषु हवनेषु तिग्मँविपः[1]। तिग्मँविपो विपस्तिग्ममन्तिग्मँविपः शच्या शच्या विपस्तिग्ममन्तिग्मँविपः शच्या[2]। विपः शच्या शच्या विपो विपः शच्या वनुथो वनुथः शच्या विपो विपः शच्या वनुथः। शच्या वनुथो वनुथः शच्या शच्या वनुथो द्रवन्ता द्रवन्ता वनुथः शच्या शच्या वनुथो द्रवन्ता। वनुथो द्रवन्ता द्रवन्ता वनुथो वनुथो द्रवन्ता। द्रवन्तेति द्रवन्ता॥ आ यो यऽ आ यः शर्व्वाभिः शर्व्वाभिर्व्वऽ आ यः शर्व्वाभिः। यः शर्व्वाभिः शर्व्वाभिर्व्वो यः शर्व्वाभिस्तुविनृम्णस्तुविनृम्णः

1. तिग्मम् विपः यहाँ सवर्णे (वा. प्रा. ४.११२) इस सूत्र से द्वित्व नहीं होता।

2. विसर्जनीयः(वा.प्रा.३.६) इस अधिकार सूत्र के अन्तर्गत पठित सूत्र अविकारं शाकल्यः शषसेषु(वा.प्रा.३.१०) के अनुसार विपः शच्या यहाँ शाकल्याचार्य के मत से विसर्ग का विकार नहीं होता है।

शर्व्वीभिर्व्वो यः शर्व्वीभिस्तुविनृम्म्णः। शर्व्वीभिस्तुविनृम्म्णस्तुविनृम्म्णः शर्व्वीभिः शर्व्वीभिस्तुविनृम्म्णोऽ अस्यास्य तुविनृम्म्णः शर्व्वीभिः शर्व्वीभिस्तुविनृम्म्णोऽ अस्य। तुविनृम्म्णोऽ अस्यास्य तुविनृम्म्णस्तुविनृम्म्णोऽ अस्याश्रीणीताश्रीणीतास्य तुविनृम्म्णस्तुविनृम्म्णोऽ अस्याश्रीणीत। तुविनृम्म्णऽ इति तुवि नृम्म्णः। अस्याश्रीणीताश्रीणीतास्यास्याश्रीणीतादिशमादिशमश्रीणीतास्यास्याश्रीणीतादिशम्। अश्रीणीतादिशमादिशमश्रीणीताश्रीणीतादिशङ्गभस्तौ गभस्तावादिशमश्रीणीताश्रीणीतादिशङ्गभस्तौ। आदिशङ्गभस्तौ गभस्तावादिशमादिशङ्गभस्तौ प्प्रजाः प्प्रजा गभस्तावादिशमादिशङ्गभस्तौ प्प्रजाः। आदिशमित्या दिशम्। गभस्तौ प्प्रजाः प्प्रजा गभस्तौ गभस्तौ प्प्रजाः पाहि पाहि प्प्रजा गभस्तौ गभस्तौ प्प्रजाः पाहि। प्रजाः पाहि पाहि प्प्रजाः प्प्रजाः पाह्यपमृष्टोपमृष्टः पाहि प्प्रजाः प्प्रजाः पाह्यपमृष्टः। प्रजाऽ इति प्प्र जाः। पाह्यपमृष्टोपमृष्टः पाहि पाह्यपमृष्टो मर्क्को मर्क्कोपमृष्टः पाहि पाह्यपमृष्टो मर्क्कः। अपमृष्टो मर्क्को मर्क्कोपमृष्टोपमृष्टो मर्क्को देवा देवा मर्क्कोपमृष्टोपमृष्टो मर्क्को देवाः। अपमृष्टऽ इत्यप मृष्टः। मर्क्को देवा देवा मर्क्को मर्क्को देवास्त्वा त्वा देवा मर्क्को मर्क्को देवास्त्वा। देवास्त्वा त्वा देवा देवास्त्वा मन्थिपा मन्थिपास्त्वा देवा देवास्त्वा मन्थिपाः। त्वा मन्थिपा मन्थिपास्त्वा त्वा मन्थिपाः प्प्र प्प्र मन्थिपास्त्वा त्वा मन्थिपाः प्प्र[1]। मन्थिपाः प्प्र प्प्र मन्थिपा मन्थिपाः प्प्र णयन्तु नयन्तु प्प्र मन्थिपा मन्थिपाः प्प्र णयन्तु[2]। मन्थिपाऽ इति मन्थि पाः। प्र णयन्तु नयन्तु प्प्र प्प्र णयन्त्वनाधृष्टानाधृष्टा नयन्तु प्प्र प्प्र णयन्त्वनाधृष्टा।

---

[1]. मन्थिपाःप्प यहाँ पर व्यञ्जन होने के कारण स्वरात् संयोगादिर्द्विरुच्यते सर्वत्र (वा. प्रा. ४.१०१) इस सूत्र से विसर्जनीय का द्वित्व प्राप्त है, जिसका विसर्जनीयः (वा. प्रा. ४.११६) इस सूत्र से निषेध होता है।

[2]. प्र नयन्तु यहाँ प्र नेतिनुदातिह्निनोमीनाम्(वा.प्रा.३.८८) के अनुसार प्र से परवर्ती नकार णकार होता है।

नयन्त्वनाधृष्टानाधृष्टा नयन्तु नयन्त्वनाधृष्टास्युस्यनाधृष्टा नयन्तु नयन्त्वनाधृष्टासि। अनाधृष्टास्युस्यनाधृष्टानाधृष्टासि। असीत्यसि॥१६॥

सुप्प्रजाः प्प्रजाः प्प्रजाः सुप्प्रजाः सुप्प्रजाः प्प्रजाः प्प्रजनयन्नप्रजनयन्नप्रजाः सुप्प्रजाः सुप्प्रजाः प्प्रजाः प्प्रजनयन्। सुप्प्रजाऽ इति सु प्रजाः। प्रजाः प्प्रजनयन्नप्रजनयन्नप्रजाः प्प्रजाः प्प्रजनयन्नपरि परि प्प्रजनयन्नप्रजाः प्प्रजाः प्प्रजनयन्नपरि। प्रजाऽ इति प्प्र जाः। प्रजनयन्नपरि परि प्प्रजनयन्नप्रजनयन्नपरीहीहि परि प्प्रजनयन्नप्रजनयन्नपरीहि। प्रजनयन्निति प्प्र जनयन्। परीहीहि परि परीह्यभ्भ्यभीहि परि परीह्यभि। इह्यभ्भ्यभीहीह्यभि रायो रायोभीहीह्यभि रायः। अभि रायो रायोभ्भ्यभि रायस्प्पोषेण पोषेण रायोभ्भ्यभि रायस्प्पोषेण। रायस्प्पोषेण पोषेण रायो रायस्प्पोषेण यजमानँय्यजमानम्पोषेण रायो रायस्प्पोषेण यजमानम्। पोषेण यजमानँय्यजमानम्पोषेण पोषेण यजमानम्। यजमानमिति यजमानम्॥ सञ्जग्ग्मानो दिवा दिवा सञ्जग्ग्मानः सञ्जग्ग्मानो दिवा पृथिव्या पृथिव्या दिवा सञ्जग्ग्मानः सञ्जग्ग्मानो दिवा पृथिव्या[1]। सञ्जग्ग्मानऽ इति सम् जग्ग्मानः। दिवा पृथिव्या पृथिव्या दिवा दिवा पृथिव्या मन्थी मन्थी पृथिव्या दिवा दिवा पृथिव्या मन्थी। पृथिव्या मन्थी मन्थी पृथिव्या पृथिव्या मन्थी मन्थिशोचिषा मन्थिशोचिषा मन्थी पृथिव्या पृथिव्या मन्थी मन्थिशोचिषा। मन्थी मन्थिशोचिषा मन्थिशोचिषा मन्थी मन्थी मन्थिशोचिषा निरस्तो निरस्तो मन्थिशोचिषा मन्थी मन्थी मन्थिशोचिषा निरस्तः। मन्थिशोचिषा निरस्तो निरस्तो मन्थिशोचिषा मन्थिशोचिषा निरस्तो मर्क्को मर्क्को निरस्तो मन्थिशोचिषा मन्थिशोचिषा निरस्तो मर्क्कः। मन्थिशोचिषेति मन्थि शोचिषा। निरस्तो मर्क्को मर्क्को निरस्तो निरस्तो मर्क्को

[1]. वा.प्रा.४.२८. के अनुसार यहाँ पृथिव्या पद स्वरान्त है।

मुन्थिनो मुन्थिनो मर्को निरस्तो निरस्तो मर्को मुन्थिनः। निरस्तऽ इति निः अस्तः। मर्को मुन्थिनो मुन्थिनो मर्को मर्को मुन्थिनोधिष्ठानमधिस्त्थानम्मुन्थिनो मर्को मर्को मुन्थिनोधिष्ठानम्। मुन्थिनोधिष्ठानमधिस्त्थानम्मुन्थिनो मुन्थिनोधिष्ठानमस्यस्यधिस्त्थानम्मुन्थिनो मुन्थिनोधिष्ठानमसि। अधिष्ठानमस्यस्यधिस्त्थानमधिष्ठानमसि। अधिस्त्थानमित्यधि स्थानम्। असीत्यसि॥१७॥

ये देवासो देवासो ये ये देवासो दिवि दिवि देवासो ये ये देवासो दिवि। देवासो दिवि दिवि देवासो देवासो दिव्येकादशैकादश दिवि देवासो देवासो दिव्येकादश। दिव्येकादशैकादश दिवि दिव्येकादश स्त्थ स्त्थैकादश दिवि दिव्येकादश स्त्थ[1]। एकादश स्त्थ स्त्थैकादशैकादश स्त्थ पृथिव्याम्पृथिव्याँ स्त्थैकादशैकादश स्त्थ पृथिव्याम्। स्त्थ पृथिव्याम्पृथिव्याँ स्त्थ स्त्थ पृथिव्यामद्ध्यधि पृथिव्याँ स्त्थ स्त्थ पृथिव्यामधि। पृथिव्यामद्ध्यधि पृथिव्याम्पृथिव्यामद्ध्येकादशैकादशाधि पृथिव्याम्पृथिव्यामद्ध्येकादश। अद्ध्येकादशैकादशाद्ध्यद्ध्येकादश स्त्थ स्त्थैकादशाद्ध्यद्ध्येकादश स्त्थ। एकादश स्त्थ स्त्थैकादशैकादश स्त्थ[2]। स्त्थेति स्त्थ॥ अप्प्सुक्षितो महिना महिनाप्प्सुक्षितोप्प्सुक्षितो महिनैकादशैकादश महिनाप्प्सुक्षितोप्प्सुक्षितो महिनैकादश। अप्प्सुक्षितऽ इत्यप्प्सु क्षितः। महिनैकादशैकादश महिना महिनैकादश स्त्थ स्त्थैकादश महिना महिनैकादश स्त्थ। एकादश स्त्थ स्त्थैकादशैकादश स्त्थ ते ते स्त्थैकादशैकादश स्त्थ ते। स्त्थ ते ते स्त्थ स्त्थ ते देवासो देवासस्ते स्त्थ स्त्थ ते देवासः। ते

[1]. एकादश एकादश तथा स्त्थ एकादश दोनों स्थलों में अथैकमुत्तरश्चश्र(वा.प्रा.४.५२) इस अधिकार सूत्र के अन्तर्गत पठित सूत्र सन्ध्यक्षर ऐकारौकारौ(वा.प्रा.४.५८) के अनुसार सन्ध्यक्षर ए वाद में होने पर अकार परवर्ती सन्ध्यक्षर के सहित ऐकार होता है।

[2]. वा. प्रा. ५.३७. के अनुसार एकादश पद का पृथक्करण नहीं होता है।

देवासो देवासस्ते ते देवासो यज्ञँय्यज्ञन्देवासस्ते ते देवासो यज्ञम्। देवासो यज्ञँय्यज्ञन्देवासो देवासो यज्ञमिममिमँय्यज्ञन्देवासो देवासो यज्ञमिमम्। यज्ञमिममिमँय्यज्ञँय्यज्ञमिमञ्जुषद्ध्वञ्जुषद्ध्वमिमँय्यज्ञँय्यज्ञमिमञ्जुषद्ध्वम्। इमञ्जुषद्ध्वञ्जुषद्ध्वमिममिमञ्जुषद्ध्वम्। जुषद्ध्वमिति जुषद्ध्वम्॥१८॥

आग्ग्रयणोस्यस्याग्ग्रयणऽ आग्ग्रयणोसि स्वाग्ग्रयणः स्वाग्ग्रयणोस्याग्ग्रयणऽ आग्ग्रयणोसि स्वाग्ग्रयणः[1]। असि स्वाग्ग्रयणः स्वाग्ग्रयणोस्यसि स्वाग्ग्रयणः । स्वाग्ग्रयणऽ इति सु आग्ग्रयणः॥ पाहि यज्ञँय्यज्ञम्पाहि पाहि यज्ञम्पाहि पाहि यज्ञम्पाहि पाहि यज्ञम्पाहि। यज्ञम्पाहि पाहि यज्ञँय्यज्ञम्पाहि यज्ञपतिँय्यज्ञपतिम्पाहि यज्ञँय्यज्ञम्पाहि यज्ञपतिम्। पाहि यज्ञपतिँय्यज्ञपतिम्पाहि पाहि यज्ञपतिँव्विष्णुर्व्विष्णुर्यज्ञपतिम्पाहि पाहि यज्ञपतिँव्विष्णुः। यज्ञपतिँव्विष्णुर्व्विष्णुर्यज्ञपतिँय्यज्ञपतिँव्विष्णुस्त्वान्त्वाँव्विष्णुर्यज्ञपतिँय्यज्ञपतिँव्विष्णुस्त्वाम्। यज्ञपतिमिति यज्ञ पतिम्। व्विष्णुस्त्वान्त्वाँव्विष्णुर्व्विष्णुस्त्वामिन्द्रियेणेन्द्रियेण त्वाँव्विष्णुर्व्विष्णुस्त्वामिन्द्रियेण। त्वामिन्द्रियेणेन्द्रियेण त्वान्त्वामिन्द्रियेण पातु पात्विन्द्रियेण त्वान्त्वामिन्द्रियेण पातु। इन्द्रियेण पातु पात्विन्द्रियेणेन्द्रियेण पातु व्विष्णुँव्विष्णुम्पात्विन्द्रियेणेन्द्रियेण पातु व्विष्णुम्। पातु व्विष्णुँव्विष्णुम्पातु पातु व्विष्णुन्त्वन्त्वँव्विष्णुम्पातु पातु व्विष्णुन्त्वम्। व्विष्णुन्त्वन्त्वँव्विष्णुँव्विष्णुन्त्वम्पाहि पाहि त्वँव्विष्णुँव्विष्णुन्त्वम्पाहि। त्वम्पाहि पाहि त्वन्त्वम्पाह्यब्भ्यभि पाहि त्वन्त्वम्पाह्यभि[2]। पाह्यब्भ्यभि पाहि पाह्यभि सवनानि सवनान्यभि पाहि

1. ए ओ आभ्यामुदात्ताभ्यामकारो नीच एव च। लुप्यते सन्धिकार्ये यत्तं चाभिनिहितं विदुः॥– व. शि. ६०.

2. अभि अभि यहाँ स्वरे भाव्यन्तस्थाम्(वा.प्रा.४.४७) इस सूत्र से इकार यकार होता है। उदात्तस्यान्तस्थीभावे स्वरितं परमनुदात्तम्(वा.प्रा.४.४९) इस सूत्र से परवर्ती अनुदात्त स्वरित होता है। युवर्णौ यवौ क्षैप्रः(वा.प्रा.१.११५) यह सूत्र क्षैप्र नामक स्वरित का विधान करता है।

पाह्यभि सर्वनानि। अभि सर्वनानि सर्वनान्यभ्यभि सर्वनानि पाहि पाहि सर्वनान्यभ्यभि सर्वनानि पाहि। सर्वनानि पाहि पाहि सर्वनानि सर्वनानि पाहि। पाहीति पाहि॥१९॥

सोमः पवते पवते सोमः सोमः पवते सोमः सोमः पवते सोमः सोमः पवते सोमः[1]। पवते सोमः सोमः पवते पवते सोमः पवते पवते सोमः पवते पवते सोमः पवते। सोमः पवते पवते सोमः सोमः पवतेस्म्माऽ अस्म्मै पवते सोमः सोमः पवतेस्म्मै[2]। पवतेस्म्माऽ अस्म्मै पवते पवतेस्म्मै ब्रह्मणे ब्रह्मणेस्म्मै पवते पवतेस्म्मै ब्रह्मणे। अस्म्मै ब्रह्मणे ब्रह्मणेस्म्माऽ अस्म्मै ब्रह्मणे क्षत्राय क्षत्राय ब्रह्मणेस्म्माऽ अस्म्मै ब्रह्मणे क्षत्राय। ब्रह्मणे क्षत्राय क्षत्राय ब्रह्मणे ब्रह्मणे क्षत्राय सुन्वते सुन्वते क्षत्राय ब्रह्मणे ब्रह्मणे क्षत्राय सुन्वते। क्षत्राय सुन्वते सुन्वते क्षत्राय क्षत्राय सुन्वते यजमानाय यजमानाय सुन्वते क्षत्राय क्षत्राय सुन्वते यजमानाय। सुन्वते यजमानाय यजमानाय सुन्वते सुन्वते यजमानायेषऽ इषे यजमानाय सुन्वते सुन्वते यजमानायेषे। यजमानायेषऽ इषे यजमानाय यजमानायेषऽ ऊर्ज्जऽ ऊर्ज्जऽ इषे यजमानाय यजमानायेषऽ ऊर्ज्जे। इषऽ ऊर्ज्जऽ ऊर्ज्जऽ इषऽ इषऽ ऊर्ज्जेद्भ्योद्भ्यऽ ऊर्ज्जऽ इषऽ इषऽ ऊर्ज्जेद्भ्यः। ऊर्ज्जेद्भ्योद्भ्यऽ ऊर्ज्जऽ ऊर्ज्जेद्भ्यऽ ओषधीभ्यऽ ओषधीभ्योद्भ्यऽ ऊर्ज्जऽ ऊर्ज्जेद्भ्यऽ ओषधीभ्यः। अद्भ्यऽ ओषधीभ्यऽ ओषधीभ्योद्भ्योद्भ्यऽ ओषधीभ्यो द्यावापृथिवीभ्यान्द्यावापृथिवीभ्यामोषधीभ्योद्भ्योद्भ्यऽ ओषधीभ्यो द्यावापृथिवीभ्याम्। अद्भ्यऽ इत्यत् भ्यः। ओषधीभ्यो

---

[1]. सोमः सोमः यहाँ निहितमुदात्तस्वरितपरम्(वा.प्रा.४.१३८) इस सूत्र से उदात बाद में होने से पूर्ववर्ती स्वरित अनुदात होता है।

[2]. पूर्ववाननुदेशः (वा. प्रा. २.७) के अनुसार पूर्ववर्ती पदार्थ का निर्देश करने वाला सर्वनाम पद अनुदात होता है। यहाँ अस्मै पद पूर्ववर्ती पदार्थ का निर्देश नहीं करता है। अतः सर्वानुदात्त नहीं है।

द्यावापृथिवीभ्यान्द्यावापृथिवीभ्यामोषधीभ्यऽ ओषधीभ्यो द्यावापृथिवीभ्याँ सुभूताय सुभूताय द्यावापृथिवीभ्यामोषधीभ्यऽ ओषधीभ्यो द्यावापृथिवीभ्याँ सुभूताय। द्यावापृथिवीभ्याँ सुभूताय सुभूताय द्यावापृथिवीभ्यान्द्यावापृथिवीभ्याँ सुभूताय विश्वेभ्यो विश्वेभ्यः सुभूताय द्यावापृथिवीभ्यान्द्यावापृथिवीभ्याँ सुभूताय विश्वेभ्यः। सुभूताय विश्वेभ्यो विश्वेभ्यः सुभूताय सुभूताय विश्वेभ्यस्त्वा त्वा विश्वेभ्यः सुभूताय सुभूताय विश्वेभ्यस्त्वा। सुभूतायेति सु भूताय। विश्वेभ्यस्त्वा त्वा विश्वेभ्यो विश्वेभ्यस्त्वा देवेभ्यो देवेभ्यस्त्वा विश्वेभ्यो विश्वेभ्यस्त्वा देवेभ्यः। त्वा देवेभ्यो देवेभ्यस्त्वा त्वा देवेभ्यः। देवेभ्यऽ इति देवेभ्यः[1]॥२०॥

इन्द्राय त्वा त्वेन्द्रायेन्द्राय त्वा बृहद्वते बृहद्वते त्वेन्द्रायेन्द्राय त्वा बृहद्वते। त्वा बृहद्वते बृहद्वते त्वा त्वा बृहद्वते वयस्वते वयस्वते बृहद्वते त्वा त्वा बृहद्वते वयस्वते। बृहद्वते वयस्वते वयस्वते बृहद्वते बृहद्वते वयस्वतऽ उक्थाव्यमुक्थाव्यँ वयस्वते बृहद्वते बृहद्वते वयस्वतऽ उक्थाव्यम्। बृहद्वतऽ इति बृहत् वते। वयस्वतऽ उक्थाव्यमुक्थाव्यँवयस्वते वयस्वतऽ उक्थाव्यङ्गृह्णामि गृह्णाम्म्युक्थाव्यँवयस्वते वयस्वतऽ उक्थाव्यङ्गृह्णामि। उक्थाव्यङ्गृह्णामि गृह्णाम्म्युक्थाव्यमुक्थाव्यङ्गृह्णामि। उक्थाव्यमित्त्युक्थ अव्यम्। गृह्णामीति गृह्णामि॥ यत्ते ते यद्यत्तऽ इन्द्रेन्द्र ते यद्यत्तऽ इन्द्र। तऽ इन्द्रेन्द्र ते तऽ इन्द्र बृहद् बृहदिन्द्र ते तऽ इन्द्र बृहत्। इन्द्र बृहद् बृहदिन्द्रेन्द्र बृहद्वयो वयो बृहदिन्द्रेन्द्र बृहद्वयः। बृहद्वयो वयो बृहद् बृहद्वयस्तस्म्मै तस्म्मै वयो बृहद् बृहद्वयस्तस्म्मै। वयस्तस्म्मै तस्म्मै वयो वयस्तस्म्मै त्वा त्वा तस्म्मै वयो वयस्तस्म्मै त्वा। तस्म्मै त्वा त्वा तस्म्मै तस्म्मै त्वा विष्ण्णवे विष्ण्णवे त्वा तस्म्मै तस्म्मै त्वा विष्ण्णवे। त्वा विष्ण्णवे

[1]. ह्रस्वव्यञ्जनाभ्यां भकारादौ विभक्तिप्रत्यये(वा.प्रा.५.१३) इस सूत्र के अनुसार देवेभ्यः पद का पृथक्करण नहीं होता है।

व्विष्ण॑वे त्वा त्वा॒ व्विष्ण॑वे त्वा त्वा॒ व्विष्ण॑वे त्वा त्वा॒ व्विष्ण॑वे त्वा। व्विष्ण॑वे त्वा त्वा॒ व्विष्ण॑वे॒ व्विष्ण॑वे त्वो॒क्थेभ्य॑ऽ उ॒क्थेभ्य॑स्त्वा॒ व्विष्ण॑वे॒ व्विष्ण॑वे त्वो॒क्थेभ्य॑ः। त्वो॒क्थेभ्य॑ऽ उ॒क्थेभ्य॑स्त्वा त्वो॒क्थेभ्य॑स्त्वा त्वो॒क्थेभ्य॑स्त्वा त्वो॒क्थेभ्य॑स्त्वा। उ॒क्थेभ्य॑स्त्वा त्वो॒क्थेभ्य॑ऽ उ॒क्थेभ्य॑स्त्वा दे॒वेभ्यो॑ दे॒वेभ्य॑स्त्वो॒क्थेभ्य॑ऽ उ॒क्थेभ्य॑स्त्वा दे॒वेभ्य॑ः। त्वा॒ दे॒वेभ्यो॑ दे॒वेभ्य॑स्त्वा त्वा दे॒वेभ्य॑स्त्वा त्वा दे॒वेभ्य॑स्त्वा त्वा दे॒वेभ्य॑स्त्वा। दे॒वेभ्य॑स्त्वा त्वा दे॒वेभ्यो॑ दे॒वेभ्य॑स्त्वा देवा॒व्य॒न्देवा॒व्य॒न्त्वा दे॒वेभ्यो॑ दे॒वेभ्य॑स्त्वा देवा॒व्य॒म्। त्वा॒ दे॒वा॒व्य॒न्देवा॒व्य॒न्त्वा त्वा देवा॒व्यँ॒य्य॒ज्ञस्य॑ य॒ज्ञस्य॑ देवा॒व्य॒न्त्वा त्वा देवा॒व्यँ॒य्य॒ज्ञस्य॑। दे॒वा॒व्यँ॒य्य॒ज्ञस्य॑ य॒ज्ञस्य॑ देवा॒व्य॒न्देवा॒व्यँ॒य्य॒ज्ञस्यायु॑ष॒ऽ आयु॑षे य॒ज्ञस्य॑ देवा॒व्य॒न्देवा॒व्यँ॒य्य॒ज्ञस्यायु॑षे। दे॒वा॒व्य॒मिति॑ देव अ॒व्य॒म्। य॒ज्ञस्यायु॑ष॒ऽ आयु॑षे य॒ज्ञस्य॑ य॒ज्ञस्यायु॑षे गृ॒ह्णामि गृ॒ह्णा॒म्म्यायु॑षे य॒ज्ञस्य॑ य॒ज्ञस्यायु॑षे गृ॒ह्णामि। आयु॑षे गृ॒ह्णामि गृ॒ह्णा॒म्म्यायु॑ष॒ऽ आयु॑षे गृ॒ह्णामि मि॒त्रावरु॑णाभ्याम्मि॒त्रावरु॑णाभ्याङ्गृ॒ह्णा॒म्म्यायु॑ष॒ऽ आयु॑षे गृ॒ह्णामि मि॒त्रावरु॑णाभ्याम्[1]। गृ॒ह्णा॒मि॒ मि॒त्रावरु॑णाभ्याम्मि॒त्रावरु॑णाभ्याङ्गृ॒ह्णामि गृ॒ह्णामि मि॒त्रावरु॑णाभ्या॒मिन्द्रा॒येन्द्रा॑य मि॒त्रावरु॑णाभ्याङ्गृ॒ह्णामि गृ॒ह्णामि मि॒त्रावरु॑णाभ्या॒मिन्द्रा॑य॥२१॥

मि॒त्रावरु॑णाभ्या॒मिन्द्रा॒येन्द्रा॑य मि॒त्रावरु॑णाभ्याम्मि॒त्रावरु॑णाभ्या॒मिन्द्रा॑येन्द्रा॒ग्निभ्या॑मिन्द्रा॒ग्निभ्या॒मिन्द्रा॑य मि॒त्रावरु॑णाभ्याम्मि॒त्रावरु॑णाभ्या॒मिन्द्रा॑येन्द्रा॒ग्निभ्या॑म्[2]। इन्द्रा॑येन्द्रा॒ग्निभ्या॑मिन्द्रा॒ग्निभ्या॒मिन्द्रा॒येन्द्रा॑येन्द्रा॒ग्निभ्या॒मिन्द्रा॒वरु॑णाभ्या॒मिन्द्रा॒वरु॑णाभ्या॒मिन्द्रा॒ग्निभ्या॒मिन्द्रा॒येन्द्रा॑येन्द्रा॒ग्निभ्या॒मिन्द्रा॒वरु॑णाभ्याम्। इ॒न्द्रा॒ग्निभ्या॒मिन्द्रा॒वरु॑णाभ्या॒मिन्द्रा॒वरु॑णा-

1. देवताद्वन्द्वानि चानामन्त्रितानि (वा. प्रा. २.४८) इस सूत्र के अनुसार यहाँ मि॒त्रावरु॑णाभ्याम् पद द्विरुदात्त है।

2. द्वन्द्वे चेन्द्रसोमपूर्वं पूषाग्निवायुषु(वा.प्रा.२.५५) इस सूत्र के अनुसार इन्द्राग्निभ्याम् यह समासात्मक पद अन्तोदात्त है।

ब्भ्यामिन्द्राग्निभ्याम्मिन्द्राग्निब्भ्यामिन्द्रावरुणाब्भ्यामिन्द्राबृहस्प्पतिंब्भ्यामि-
न्द्राबृहस्प्पतिंब्भ्यामिन्द्रावरुणाब्भ्यामिन्द्राग्निब्भ्याम्मिन्द्राग्निब्भ्यामिन्द्रावरु-
णाब्भ्यामिन्द्राबृहस्प्पतिंब्भ्याम्[1]। इन्द्राग्निब्भ्यामितीन्द्राग्नि भ्याम्। इन्द्राव-
रुणाब्भ्यामिन्द्राबृहस्प्पतिंब्भ्यामिन्द्राबृहस्प्पतिंब्भ्यामिन्द्रावरुणाब्भ्यामिन्द्राव-
रुणाब्भ्यामिन्द्राबृहस्प्पतिंब्भ्यामिन्द्राविष्णुंब्भ्यामिन्द्राविष्णुंब्भ्यामिन्द्राबृह-
स्प्पतिंब्भ्यामिन्द्रावरुणाब्भ्यामिन्द्रावरुणाब्भ्यामिन्द्राबृहस्प्पतिंब्भ्यामिन्द्रावि-
ष्णुंब्भ्याम्। इन्द्राबृहस्प्पतिंब्भ्यामिन्द्राविष्णुंब्भ्यामिन्द्राविष्णुंब्भ्यामिन्द्राबृ-
हस्प्पतिंब्भ्यामिन्द्राबृहस्प्पतिंब्भ्यामिन्द्राविष्णुंब्भ्याम्। इन्द्राबृहस्प्पतिंब्भ्या-
मितीन्द्राबृहस्प्पतिं भ्याम्। इन्द्राविष्णुब्भ्यामितीन्द्राविष्णु भ्याम्॥२२॥

मूर्द्धानन्दिवो दिवो मूर्द्धानम्मूर्द्धानन्दिवोऽ अरतिमरतिन्दिवो मूर्द्धान-
म्मूर्द्धानन्दिवोऽ अरतिम्। दिवोऽ अरतिमरतिन्दिवो दिवोऽ अरतिम्पृथिव्याः
पृथिव्याऽ अरतिन्दिवो दिवोऽ अरतिम्पृथिव्याः। अरतिम्पृथिव्याः पृथिव्याऽ
अरतिमरतिम्पृथिव्या व्वैश्वानरंव्वैश्वानरम्पृथिव्याऽ अरतिमरतिम्पृथिव्या व्वैश्वा-
नरम्। पृथिव्या व्वैश्वानरंव्वैश्वानरम्पृथिव्याः पृथिव्या व्वैश्वानरमृतऽ ऋते व्वैश्वा-
नरम्पृथिव्याः पृथिव्या व्वैश्वानरमृते। व्वैश्वानरमृतऽ ऋते व्वैश्वानरंव्वैश्वानरमृतऽ आ
जातञ्जातमऽ ऋते व्वैश्वानरंव्वैश्वानरमृतऽ आ जातम्[2]। ऋतऽ आ जातञ्जातमऽ
ऋतऽ ऋतऽ आ जातमग्निमग्निञ्जातमऽ ऋतऽ ऋतऽ आ जातमग्निम् । आ
जातम्। जातमग्निमग्निञ्जातञ्जातमग्निम्। अग्निमित्यग्निम्॥ कविꣳ
सम्म्राजꣳ सम्म्राजङ्कविङ्कविꣳ सम्म्राजमतिंथिमतिंथिꣳ सम्म्राजङ्कविङ्कविꣳ

---

[1]. इन्द्राबृहस्पतिभ्यामिन्द्राबृहस्पती इति त्रीणि (वा. प्रा. २.४९) इस सूत्र के अनुसार इन्द्राबृहस्पतिंभ्याम् पद में तीन अक्षर उदात्त हैं।

[2]. वा. प्रा. ६.६. के अनुसार यहाँ आ उपसर्ग अनुदात्त नहीं होता है।

सम्म्राजमतिथिम्[1]। सम्म्राजमतिथिमतिथिꣳ सम्म्राजꣳ सम्म्राजमतिथिञ्ज-नानाञ्जनानामतिथिꣳ सम्म्राजꣳ सम्म्राजमतिथिञ्जनानाम्। सम्म्राजमिति सम् राजम्। अतिथिञ्जनानाञ्जनानामतिथिमतिथिञ्जनानामासन्नासञ्जनानामतिथि-मतिथिञ्जनानामासन्। जनानामासन्नासञ्जनानाञ्जनानामासन्ना पात्रम्पात्रमास-ञ्जनानाञ्जनानामासन्ना पात्रम्[2]। आसन्ना पात्रम्पात्रमासन्नासन्ना पात्रञ्जनयन्त जनयन्त पात्रमासन्नासन्ना पात्रञ्जनयन्त। आ पात्रम्। पात्रञ्जनयन्त जनयन्त पात्रम्पात्रञ्जनयन्त देवा देवा जनयन्त पात्रम्पात्रञ्जनयन्त देवाः। जनयन्त देवा देवा जनयन्त जनयन्त देवाः। देवाऽ इति देवाः॥२३॥

ध्रुवोस्यसि ध्रुवो ध्रुवोसि ध्रुवक्षितिर्ध्रुवक्षितिरसि ध्रुवो ध्रुवोसि ध्रुवक्षि-तिः। असि ध्रुवक्षितिर्ध्रुवक्षितिरस्यसि ध्रुवक्षितिर्ध्रुवाणान्ध्रुवाणान्ध्रुवक्षिति-रस्यसि ध्रुवक्षितिर्ध्रुवाणाम्। ध्रुवक्षितिर्ध्रुवाणान्ध्रुवाणान्ध्रुवक्षितिर्ध्रुवक्षिति-र्ध्रुवाणान्ध्रुवतमो ध्रुवतमो ध्रुवाणान्ध्रुवक्षितिर्ध्रुवक्षितिर्ध्रुवाणान्ध्रुवतमः। ध्रुवक्षितिरिति ध्रुव क्षितिः। ध्रुवाणान्ध्रुवतमो ध्रुवतमो ध्रुवाणान्ध्रुवाणान्ध्रुवत-मोच्युतानामच्युतानान्ध्रुवतमो ध्रुवाणान्ध्रुवाणान्ध्रुवतमोच्युतानाम्। ध्रुवतमो-च्युतानामच्युतानान्ध्रुवतमो ध्रुवतमोच्युतानामच्युतक्षित्तमोच्युतक्षित्तमोच्यु-तानान्ध्रुवतमो ध्रुवतमोच्युतानामच्युतक्षित्तमः। ध्रुवतमऽ इति ध्रुव तमः। अच्युतानामच्युतक्षित्तमोच्युतक्षित्तमोच्युतानामच्युतानामच्युतक्षित्तमो वैश्वानराय वैश्वानरायाच्युतक्षित्तमोच्युतानामच्युतानामच्युतक्षित्तमो वैश्वा-नराय। अच्युतक्षित्तमो वैश्वानराय वैश्वानरायाच्युतक्षित्तमोच्युतक्षित्तमो

[1]. प्रकृत्या सम्राड्ढाम्राजि(वा.प्रा.४.६) इस सूत्र में सम्राट् तथा साम्राज् (साम्राज्य) पद में मकार का प्रकृतिभाव कहा है। यहाँ सम्राजम् सम्राट् पद का द्वितीया का एकवचन है।

[2]. वा. प्रा. ६.२६. के अनुसार पात्रम् पद में दो स्पर्श हैं।

